नं: ११६-घ

सिध्दान्तकौमुदी व्याख्या

वृहच्छब्देन्दु शेखर:

अपूर्ण पत्राणि ३६

नं॰: ११६ – घ

सिद्धान्त कौमुदी व्याख्या

बृहच्छब्देन्दुशेखर: (अपूर्ण)

पत्राणि ३–६

पि। एतेन ष्टुरणागुणे इति निषेधास्समासो दुर्लभः इत्यपास्तं। गुणेन निषेधस्यानित्यत्वाच्च संख्या
या अगुणत्वाच्च। कुह्मस्य संबंधि कुसुमं संबधितत्वं तदेकत्वं हृष्णोकत्व मित्येवं विग्रहेण सा
धुत्वे निषेधस्याप्राप्तेश्च। एत्येधत्यूठ्सु। ऊठ उपधाते इत्यस्याभावादावेकीयमतेन पष्ठैमा म
नस्य दीर्घादेस्तु न ग्रहणं॥ तथा मस्यूठि षु इत्येव स्पष्टप्रतिपत्त्यै वदेत्॥ आदेशस्य प्रसिद्ध
त्वाच्च। अष्टाध्यायीपठितत्वेन प्रत्यासन्नत्वाच्च। आ अवतीति ओः जनस्य ओर्जनैः जनोभ्या
मित्यादौ राजादित्वसंभवे येचीति नोठो विरोधः॥ विश्वौरुः प्रष्ठौरुः इति विभाषा पूर्वाह्ले
ति सत्रे भाष्यप्रयोगात्। तदाहा राजा घोरिति। इलीका वादौ प्रतिषेधो वक्तव्य इति वार्तिके ग्रहणरास
ग्रहणं बहुमुपलक्षणमिति तिना स्पर्यं। एति रजेऽऐव प्रसिद्धत्वात्। तेन वी गतीत्यत्र प्रश्लिष्टस्य न वृ
द्धिर्तीरित्याहुः॥ ङ्पे यतेइति। यद्यपि परत्वाद्वृद्धिर्नैधतेरेव ग्रहणेन संपूर्णस्यैकादेशः प्राप्नोति।

झरो झरि सवर्णे। हलोयमामित्यतो हल इति लोप इति चानुवर्तते। झयो ह इत्यतो वावसाने।
इत्यतो वा विकल्पोऽनुवर्तते। हयवरट् इत्यत्र भाष्ये स्पष्टमिदं। हलोयमामित्यस्य स्पष्टमिदं। हलो
यमामित्यस्य वैकल्पिकत्वेन तद्विषयेऽप्यनुभव इत्यादौ चरितार्थमचो रहेति द्वित्वमिति
अस्य नित्यत्वे शरोचीति तन्निषेधो व्यर्थ इति भस्यानित्यत्वे सज्ञापक इत्यर्थः। तस्त्रस्ठ
मस्य ज्ञापकत्वखंडनपरं द्वित्वं लोपापवादः स्यादिति भाष्यं तु भयोर्यैर्लोपयोर्वैकल्पिक
त्वे इदं ज्ञापकमित्यर्थखंडनं परमिति तद्विरोध इत्याहुः। झयोऽस्यीति तु न सूत्रितं। निंस्व
त्रिंमे इत्यादावव्याप्तेः। वृद्धिरेचि। नन्वस्य गुणापवादकत्वादेक इत्यधिकाराएदं नरतमप
रिभाषया च सिद्धेव द्विग्रहणं व्यर्थमिति चेन्न वृद्धिरिति योगविभागार्थत्वात् तेनाक्ता
हूहिन्यामित्यादिना पूर्वमित्याहुः। ऋस्मेकेति। हृस्मेति संबुध्यंतं एपयक्यदम्। एवमन्ये

तथाप्यादेः परस्येत्यादेर्वैयर्थ्यः॥ नन्वेआद्योरितिवैयर्थ्यं ऽपेतः प्रेरिध्रदिस्यत्रतुनिर्दिश्यप
माणयेववारणात्‌। तथाहि। अवर्णादेत्ये ध्रसोः पूर्वस्यपरस्यचनिर्दिश्यमानयोरत्याद्यो
र्वृद्धिरितिसूत्रार्थः। तत्रनिर्दिश्यमानएकारएवनविकारइतितत्रनदोषः। अतएवपचेयुरि
त्यादौपचइत्युरितिस्थितेडस्यपदांतादितिन। अन्यथापररागमादितिन्यायेनेयुसडु
स्त्वेनतद्दुर्वारंस्यात्‌॥ ममतुइकारस्यानिर्दिश्यमानत्वान्नदोषइतिचेन्न। निर्दिश्यमानस्ये
त्यस्ययतःषष्ठ्युच्चारिता तस्यग्रहणमित्यर्थः॥ आदेचोरित्यत्रतुनषष्ठी। पूर्वपरयोरितिष-
ष्ठीतुपूर्वपरशब्दाभ्यांतयोस्तुनग्रहणमिष्टं। तदर्थयोस्तुनउत्तरेणषष्ठ्युच्चारणं इत्यदो
यात्‌। येनविधिरितिसूत्रेभाष्यकैयटयोर्ध्वनितमेतत्‌। पचेमयुरित्यादौतुनदोषः॥
वाक्यार्थबोधवेलायामदेःपरस्येत्येकवाक्यातयोःपूर्ववर्णपराद्योरेकादेशइत्यर्थेऽप

2 स्थितत्वादुकारस्यैव परादित्वेन ग्रहणात् । यदागमा इति न्यायस्तु लक्ष्यसंस्कारवेलोपस्थि-
त इत्यदोष इत्याहुः ॥ अक्षादूहिन्यामुपसंख्यानं । अत्राप्यक्षादूहिनीशब्दे परे त्वैपर्ये जातेऽक्षौ
त्यस्येत्यनेनाकारस्यादेः परस्येत्यकारस्य च वृद्धिः । तस्मादित्युत्तरस्येत्येतद्बाधितं परत्वप्र-
ष्ठितत्वात्तद्विषय एवादेः परस्येत्यप्रवृत्तिरिति मतां तु रेपदा स्वैरीति निर्देशादक्षशब्दावय-
वाकारादूहिनीशब्दावयवे वि विशेष्यभूतयोः पूर्वपरयोर्वृद्धिरेकादेश इति प्रत्ययलक्षणे
सूत्रस्थभाष्यस्वरसः ॥ अक्षौहिणीति । अक्षाणामूहिनीति विग्रहः । न तु अक्षाणामूहः सो-
स्त्यस्या इति तथा सत्यंतरंगत्वाद्गुणे अक्षोहिणी स्यैव स्यात् । अपवादभूताया अपि वृद्धेरूहि ग्रामर
नीशब्दे न विग्रहे चारितार्थ्यात् । एतेनोपसंजनिष्यमाणनिमित्तोऽप्यपवाद उपसंजाते निमित्ते नि-
तमप्युत्सर्गं बाधत इति न्यायेन गुणो न स्यादित्यपास्तं । तस्याचरितार्थविषयकत्वात् । यद

पि पूर्वोत्तरपदनिमित्तकार्यत्वादन्तरंगोप्येकादेशो नेति निषेधात्सर्वं गुणप्रवृत्ते रिनो हृद्धिरिति रू
पसिद्धिः स्पष्टैवेति। तदपि न। तद्रूपकीभूतो हि नीशब्दस्य कार्यितार्थेनाप्यर्थनाप्ययं वत्साभावे
नवद्धेरप्राप्तेः। स्वैनेरितुमिति। यदा त्वीरणमीर इति घञन्तेन समस्तशब्दस्य स्वेनाभिप्रायेणेर इति
साधनं कृतेति समासे मत्वर्थीये तौ मत्वर्थीये च्वन्ते रिन्शब्देन वा समासमासक्तदा तदवायवीभूते
स्त्रीशब्दमादायैव सिद्धिरिभावः। भाष्यकृत्तु मत्वर्थीये तिना स्वैरिशब्दं साधयित्वा लिने श्वानभि
धानं स्वीकृत्यैरिसत्तहणं त्याच ख्यो। केचित्तु स्वतंत्रशब्दस्वैरिशब्देन चक्षीलिकणिनेः प्रसंगए
वन फलापेक्षायामपि स्वेच्छया व्यवहरणं स्वातंत्र्यं। फलानपेक्षा प्रवृत्तिश्चेता चक्षील्यमिति
मेरादित्याहुः। स्तुरदार्त इति कार्यकालपक्षे कर्तृतीयासमासापेक्षतया बहिरंगत्वेन वृद्धेरसिद्ध

त्वान्न विसर्गः॥ न च बहिरंगत्वस्यांतरंगसापेक्षत्वेनांतरंगस्य च पूर्वत्रासिद्धमित्यसिद्धत्वाद
3 स्य बहिरंगत्वाभाव इति वाच्यं। कार्यकालपक्षे बहिरंगपरिभाषोपस्थितिसामर्थ्येन पूर्वत्रा
सिद्धत्वस्य बाधात्। अत एव वाक्कुंठ इत्यादौ न विसर्गः। न चैवमपि किं कार्यकालपक्षमाश्रि
त्य पूर्वत्रासिद्धमित्यस्य बाधः कार्यः उत यथोद्देशमाश्रित्यांतरंगपरिभाषाया बाध इत्यत्र वि
निगमकाभावात्। अनया पूर्वासिद्धत्वेन पूर्वत्रासिद्धमित्यस्य प्रवृत्तिबंधे न परस्परविरो
धे द्वयोरप्यप्रवृत्त्यापत्तौ विसर्गो दुर्वार इत्यस्य एवं चेदं रवरवसालपोरिति सूत्रे भाष्य इति वा
च्यं लत्वस्यानुरोधे नात्र कार्यकालपक्षस्यैव बहिरंगपरिभाषाया एव चांगीकारात्। हरिश्चि रामः
रित्यादौ पूर्वसवर्णदीर्घासिद्धत्वबोधनेन पूर्वत्रासिद्धमित्यस्य सर्वथा बाधाभावाच्च।
स्पष्टं चेदं तन्नैव कैयटे। संयोगांतलोपसूत्रे भाष्ये च व्याख्यातं। न तु नाजानंतर्ये इति निषेधः।

अत्र च षत्वतुकोरिति सूत्रस्थं षत्वग्रहणं ज्ञापकं। अन्यथा कोसिचदित्यादौ परत्वान्नस्तोपे
त्व बहिरंगे कादेशस्यासिद्धत्वेन षत्वाप्रवृत्तौ किं तेन। त्रियादौ स्रुष्टुपि वर्त्ते कार्यकालपक्षा
श्रयेणास्यासिद्धत्वादिति चेन्न। पश्चात्प्रवर्त्तमाने विधावजानंतर्ये तत्प्रवृत्तेः। अत एव प
चावेदमित्यादौ तदप्रवृत्तिः। न च षत्वविधाविण ग्रहणं तज्ज्ञापकं एवेति न तत्राजानंत
र्याजानंतर्ये तत्र ध्येऽचामपूर्वं तर्भाव सत्वे तादोषात्। अत ए [illegible] वाचोग्रानंर्यमि
मितिवदंतः। परास्ताः। धर्मिग्राहकमानादेव चास्याः स्वबोधको तस्यविभक्तिबोधिता
ज्जिष्टानंतर्ये एव प्रवृत्तिः॥ अत एव ग्रामणिकुलमित्यादौ कृत्स्यस्येति तुक् अस्ति
द्व परिभाषया व्यावर्त्तितः। कृन्मेजंत इति सूत्रे भाष्ये॥ एतेन तुग्ग्रहणमपि ज्ञापक
मित्यपास्तं। ग्रेत्येत्यादौ समासोत्तरत्व प्रवृत्त्या पूर्वं पूर्वपदसंधेन समासे जाते तत्र

४

संहितायानित्यत्वात्संज्ञाबुत्पत्तिपर्यंतमप्यसंहितयावस्थानासंभवेन पूर्वमिकारेणे
वहिर्भूतः स्यव्यपेक्षत्तुगपेक्षयाघात्तूपसर्गकार्यत्वेन तस्यांतरंगत्वेन वहिरंगासि
द्धत्वस्य तुकप्रपादत्वाच्चेतिदिक्॥ प्रवत्सतरः अत्रवत्सवत्सरशब्दावपिकेचित्पठंति।
तन्नाख्यानुक्तं॥ उपसर्गादृति धातौ॥ तपरणाद्दकारशब्दाचारकिपिउपकारतीत्यादौ वृ
द्धिवारणायउपकारीत्यादौवृद्धिवारणार्थं तुवाक्षुपीत्येतदर्थं ऋणार्थं चासौत्रऋतिस्तु
नगनहणं ऋतावित्येवसिद्धे धातुग्रहणात् स्मार्त्तचीति वर्णप्रकरणाच्च अंतादिवच्चा
एः पूर्वपरयोरितिलिवर्त्तते। एकाचेस्वपच। अंतादिवद्भावुपस्थितेकादेशास्थानिपरो॥
पूर्वपरशब्दौचतद्घटितसमुदायपरौ। एवंचपूर्वस्यपरस्यचसमुदायस्यांतादिभ्यां रामः ४
वर्णाभ्यांपृथगवस्थिताभ्यांयेव्यवहाराः प्रातिपदिकत्वादिकंसमुवंतत्वप्रत्ययत्वा

इयस्तिहृतेकार्शेशस्यापिभवतिनतुतद्वर्णमात्रहृतयोऽन्त्यह्रस्वत्वादयस्तत्पर्यः तस्फुलि
तमाह॥ योयमित्यादि। एवंच पूर्वपरयोरिति द्विवचननिर्देशेनोभयोरपि प्रत्येकं स्थानि
त्वसत्वेन स्थानिवत्सूत्रेणैव सिद्धमिदं न कार्यमिति प्राञ्चः। अत्र वदन्ति। एकादेशो वर्णयो
रेव स्थानित्वं न समुदायस्येति सर्वाशब्दादेः सर्वनामत्वादेश स्थानिधर्मत्वाभावात्
किंच षत्वतुकोरसिद्ध इति सूत्रे पदान्तपदाद्योरेकादेशोऽसिद्ध इत्यवश्यं वाच्यं। अन्यथा वेञ
अस्ते ल्यपि संप्रसारणे उदित्यादौ तुगभावापत्तेः॥ शाकहृष्टुरित्यादौ दोषः। लिपि संप्रसा
रणे षत्वापत्तेश्च। एवं च तत्र पदस्येत्येव वाच्यं। अन्तादिवत्यनुवृत्त्या पूर्वपरयोरित्यनु
वृत्त्या चेष्टार्थलाभः। पूर्वपरयोरित्यनुवृत्त्या चेष्टार्थलाभः पूर्वपरयोरित्यनुवृत्त्या
दौ पदस्य विभज्यान्वाख्यानेपि न दोषः पूर्वपदान्तपरपदाद्योरित्यर्थात्। प्रत्येकत्वारो

५॥

तुक्॰ सिद्धिस्तु सुवं तेन समासेवोध्यागतिकारकेत्यस्यानित्यत्वात् । परग्राह्येनार्यवत्तउ
5 पलक्षणाद्वेति दिक् ॥ निर्दैग्धा इति ॥ न चावहिरंगस्य गुणस्यासिद्धत्वेन रेफाभावान्न वि
र्ग सर्गो इति वाच्यं ॥ पदद्वयसंबंधिवर्णद्वयोश्रितत्वेन गुणस्यैव पदद्वयसंबंधिरेफत्वस्यात्म
कवर्णद्वयाश्रितत्वेन विसर्गस्यापि तत्वात् । किंच कार्यकालपक्षेपि त्रिपाद्यां तदप्रवृत्तिरेवेत्य
न्यत्र प्रपंचितं ॥ अत एव विसर्जनीयसूत्रे भाष्येऽयुक्तोऽयं परिहारो न वा बहिरंगलक्षणत्वा
दित्युक्तं ॥ एवं च तत्र वचनान्येव ज्ञायन्ते ॥ उभयथर्क्षिति निर्दैग्धा दुरुपरः पर इति ग्रामस्त्वनि
ष्पन्नरेफस्य पदांतरनिमित्तस्य न विसर्ग इति ज्ञापकानुसरणं वा कर्तव्यं ॥ पुनरिति ॥ इदं प्रकृ
त सूत्रे भाष्ये स्पष्टं । एतेन न माड्योगे इति सूत्रे भाष्येऽजादीनामटा सिद्धमित्युक्त्वा प्रोक्तिस रान्तु ८
त्रं विधायास्य योह स्मेतीत्यत्र वृद्धिमाशंक्य धातोरावित्यपकृष्य समाहितत्वेन धातुग्रहण

स्य चारितार्थ्याद्योगविभागे मानाभाव इत्यपास्तं ।। पूर्वसूत्रे एव कर्तव्ये ऽत्र करणेनेदं ज्ञापकं तस्या
पि कुंड्याकल्पाज्ञाज्ञत एवोभयोः शेष इति भाष्ये उक्तं ।। वा सुप्यापिशलेः ।। सुप्यापिशलेः ।। सुप्या
ताविति । सुबंतप्रकृतिके धाताविवत्यर्थः । तुल्यास्य सूत्रे भाष्ये उपाकारीयति उपाकारीयति उ
पाल्कारीयतीति वा सुप्यापिशलेरित्यस्योदाहरणात् । सुबंते धाताविवत्यर्थे हि तदसंगतं स्यात् ।
शास्त्रे सुबंतस्य धातुप्रकृतित्वेनोक्तः सुपीत्यतत्र कृतिके लक्षणे बोधितान तु तदवयवके ल
क्षणे बोधितान तु तदवयवके इति बोध्यं । तेन ऋषभं । क्विसोहल्ङ्यादिलोपे प्रकृत प्रार्त इत्यादौ ऋ ३१
षभपुत्रमाचष्टे ऋषभपुत्रयति प्र ऋषभपुत्रयति प्रार्षभपुत्रयतीत्यादौ च पूर्वसूत्रेण
नित्यमेव वृद्धिः न त्वनेन विकल्पः । एवं चेति । एतद्वृत्तिंकारंभसामर्थ्यादेव सूत्रे धाताविवि

तिङुपसर्गादितिचमंडूकप्लुत्याऽनुवर्तिते।ओम्यारंभाच्च।अचोंत्यादिटिअंत्यादितिनित्यसापेक्ष
त्वाद्बहुव्रीहिः॥ओत्वोष्ठयोःसमासेवायेतुसमर्थःपदविधिरित्यस्योद्देश्यकोटौपदगंसत्वे
प्रतेरंगीकारेऐकार्थीभावपरतयाभाष्यादौतस्याख्यानेनचओत्वोष्ठादीनामवर्णांतस्यच
समासएवैकार्थीभावसंभवेनतथैवसमासप्रवृत्तिसिद्धौसमासग्रहणंव्यर्थमितिचेन्न।
एङिपररूपमित्यत्रापितस्यवृत्त्यापत्त्याप्रेजतेरित्यादिसिद्ध्यापत्तेः।समासेगुणेसंगइत्या
दौसमासग्रहणेनपदविधिरितिसूत्रसामर्थ्येनचभाष्यादिस्वरसेनचोपपदमतिङित्या
दौयत्रपदत्वेनसुप्सुपेत्यादौचयत्रसुबंतत्वेनवासामासाद्युद्देश्यपभातत्रैवएतत्परिभाषा
प्रवृत्तिस्वीकाराच्च।ओत्वोष्ठादिमात्रस्यपदत्वाभावाच्च।ओमाङोश्च।एतदर्थमेवएङोङि राम०
तिनासूत्रितेनेपदार्थकाङासहक्रमभंगाद्स्यसमासेऽद्य अर्थभइत्यत्रपररूपेऽप्यर्थ ६

भ इति भवति· अत एवात्र एङोन्ति नानावर्तते· तदुक्तं भाष्ये। चोऽनर्थको ऽनधिकारादेङ इति·
अत एवाव्यक्तानुकरणस्यातं इति सूत्रे न दोषः। न चात्रपरत्वाद्दीर्घप्रसंग इति वाच्यं· तस्या
नुरोधेनात्र बाध्यसामान्यचिंतानाश्रयणात्· इदं च श्वेति चौरेष्वाव्रूपकं। अन्यथा सोपिपु
रस्तादपवादा इति न्यायेन ओमाङोश्चेत्यस्यैव बाधः स्यात्· न तु स्यपदांतादिसस्य। प्लुत एवो
श्रीयत औंकारीयदित्यत्र वृद्धिः। इदमेवाभिप्रेत्य ग्रहणतरार्थमित्युक्तं मनोरमायामि
त्याहुः। अव्यक्तं शब्दं क्वाचष्टे। ध्वनेरिति। तस्य चानुब्धोनुकरण एव संभवतीत्यत आह। इ
अनुकरणस्येति। एवं चानुकरस्येति सूत्रे स्य स्वार्थमिति भावः। ननूभयत्रेतौ पुच्चैरितव्य च्चो
क्तानुकार्ये व्यावर्त्यर्थं तदिति चेन्न। तस्येति शब्दपरत्वाभावात्· तस्मात्त्वनुकरणत्वस्ये
वसत्वात्। अत्रालोंत्यस्येति न प्रवर्तते। नानर्थके इति निषेधात्· आम्रेडितस्यैवेतिव

7 त्तः व्येनाम्रेडितस्येत्यस्यारंभाच्च॰ यत्तु पूर्वपरयोरित्यत्र समुदायस्य षष्ठीनिर्दिष्टत्वादंतरत्यस्य
पंचम्यंतत्वाञ्चतोत्यादेशः इति कैयटादयः॥ तन्न अन्यादृहित्याभित्यादौ दोषापत्तेः॥ अत्र पूर्वपर
योः प्रत्येकं स्थानित्वस्वीकाराच्च॥ अत एव कृष्णर्द्धिरित्यादौ स्थानिकत्वप्रयुक्तरपरत्वसिद्धिः॥
ध्वनितं चेदमुपधासंज्ञासूत्रे कैयटे॥ एते नाद्भिन्नव्यावृत्त्यर्थं तदित्यपास्तं॥ नाम्रेडितस्यांत्यस्य तु वा
तकारमात्रस्येति॥ अत्र केचित्॰ तथैवं नाम्रेडितस्तु वेति एव सूत्र्यतामिति वाच्यं॥ ताम्रेडितस्य
त्यंशस्यान्वाचयशिष्टत्वसंपन्नार्थत्वात्॰ तेन वटत्वगित्यादौ वंत्यस्य पाक्षिकं पररूपं भव
त्येव॰ नन्वनाम्रेडितस्य अंत्यस्य वेति योगद्वयेनैव पूर्वस्य नित्यत्वे उत्तरस्य वैकल्पिकत्वे च सि सामुः
द्धे तु शब्दो व्यर्थ इति वाच्यं॥ निषेधोऽयं कृत्स्नमात्रविषयो द्वितीयं तकारात् तकाराद्यंतमात्रवि
षयमिति विषयभिन्नो घस्य स्य घतया बोधनार्थं तस्य सत्त्वात्॰ एवं च पटद्वैंपरइत्या

दौ अंत्याकारस्य पररूपे परपदिस्याहेत्यपि पक्षेवोध्यमिति वदंति ॥ तत्तु भाष्यानुक्तत्वाद्दैचि
त्र्यार्थत्वस्यापि संभवाच्चचिंत्यं ॥ तस्य परमाम्रेडितं ॥ तस्य ग्रहणं तरस्य सर्वस्य द्वे इति प्रक
रणे द्विरुक्तस्यैव संज्ञाय यास्यात् एकाचो द्वे इत्यादि प्रकरणे द्विरुक्तस्य माभूदिति अन्यथा
द्वे इत्यनुवर्त्य षष्ठ्या विपरिणामेन च सिद्धे तद्वैयर्थ्यं स्पष्टमेव । सलांजनोंते · पदस्येत्यधिका
रात् ८।१।१६ पदांते इति · अंतेग्रहणं स्पष्टार्थतिनिष्कृत्यर्थं · तथाहि · भाष्ये दधस्त्थयोश्चेति सूत्रे अस्त्वो
रित्यनुकर्षकचकारखंडनोत्तरं तथैवापि ग्रहणं ज्ञापकमकर्तुं कथं · सलिष्टपं तस्य ·
स्तुच्यते · तथोश्चायं सलिष्टपं तो भवति नान्यत्रेत्याद्युक्ता सम्बध्यस्त्वघोध इति सूत्रेऽक्तं अथ
इति किमर्थं धनः धन्यः अध इति ज्ञापकमवकुं । कस्मान्न भवति · धत्तः धत्थः इति · जश्त्वेयोग
विभागः करिष्यते · इदमस्ति दधस्त्थोश्चेति · ततो वदामि सलांजनः सलांजनः ॥ १८

१ लांजशोभवंतिदधस्तथोः। ततोंऽते। अंते च झलां जशो भवंतीति न तत्र जश्त्वे कृतेऽसंयोगांतत्वा
न्न भविष्यतीति। पद्यपि भाष्ये तयोरित्युक्तमत्र सूत्रे तथापि तज्झलीत्यनुवृत्त्या फलितस्यार्थ
स्य कथनं। अन्यत्र जश्त्वस्य फलकलाभावेन तयोरेव पर्यवसानात्। यथाश्रुतं तु न युक्तं पूर्व
सूत्रे झलीत्यनुवृत्त्या तयोरित्यस्य प्रत्याख्यानात्। एवं चांते इत्यस्याभावे झलां जश् झशि इति सू त्रं
तत्र झलामिति योगविभागेन द्वितीयसूत्रं स्यात्। जश्शीति पूर्ववाक्यं। झषंतस्येति वर्तः। स
षंतस्य दधोः जशो भवंति झलि परतः। ततो झसामिति। पदस्येत्यनुवर्तते। झलंतस्य पदस्य
जशो भवंति झलि परत इत्येवार्थः स्यात्। तथा सति वीप्सामित्यादाववजश्त्वं न प्रवर्त्तेत न तु वाग्भ्वा भ्या
गीभ्यां इत्यादौ। अंतेग्रहणे कृते तु तत्सामर्थ्यात् पदांतमात्रे जश्त्वं प्रवर्तत इति सर्वेष्टसिद्धिरिति न दो राम्० ८
ष इति भावः। एतद्भाष्यप्रामाण्येन एकाचो बश इति सूत्रे झषोर्ग्रहणसामर्थ्येन झलीत्यस्यासंबं

येपि मेडूकसुस्योत्तरत्रानुवर्तते॰ यद्वा तत्रापि संबध्यते॰ स्तलादौ सकारे ध्वस्ता बद्धे चेत्यर्थे नन दोष
से॰ इति तत्संहल्संधिप्रकरणेस्पैंदाहृणतयाव्याख्यास्यमानमपीदमत्र स्मारितं। एवं श्रादितीत्यत्रा
पि बोध्यं। तत्रैव कुतो न स्यादित्तमिति चेत्॰ त्रिंशापाचोद्यमेतत्॰ सर्वोपकारकत्तयाप्रकरणांते॰
स्मारणमित्यप्याहुः॰ स्मित इति॰ एओङ्सूत्रेभ्यो ष्येमातृणामित्यादौ णत्वादिसिध्यर्थं सवर्णसंग्रा
कर्तव्यवर्णैकदेशावर्णग्रहणेन ग्रहणं तेशतिपदेश्येरं ऽस्मूलृय॰ स्व इत्याभिः स्वाभ्याचात्सरतीत्यादौ सवर्ण
दीर्घस्तु गोस्त्र्यजन्तस्वलठनोऽग्रांकायादीर्घस्य तु विधानसामर्थ्यात्तपरकरणसामर्थ्यान्नो [illegible]च र
ति सूत्रस्थ नो ग्रहणसामर्थ्यैर्भेदेनाप्रतिभासमानेषु वर्णावयवेषु अवयवसदृशास्वतंत्रव
र्णाश्रयकार्याभावत्तापत्तरूपसमाधानस्यान्वकरणवत् प्रातर्कतमित्यत्र रोरीत्यस्य तद्दल का
रऊत्यादौ तोर्लीत्यस्य चरां कासमाधानाद्यकरणेन सर्वत्राऽभक्तिस्सिद्धेर्रयवरट्सूत्रेभाष्येभ्याम्नि
रबा

9 त्यत्र ऋग्रहणं कर्तव्यं रषाभ्यामित्येव सिद्धमित्युक्तान्नसिध्यति॥ यत्तु द्रिकात्परं भक्तेस्तेन व्यवहितत्वान्नप्रा
प्नोतीत्युक्तं तच्च परत्वाऽभक्ति सिद्धमिति ऋलृकस्तत्र स्थयोरर्द्धमात्राऽऽगमस्याभितः क्लृप्तत्वेन तथैवोचितत्वा
दिति बोध्यं। परत्वाऽभक्तेः फलं तु कर्तृचक्लृपे इत्यादौ विसर्गः पकारस्य यणो मय इति द्वित्वं च नेति भा
वः। व्यवस्थितविभाषा चेयं। तेन ह्रस्वऋकाररूपस्थानिके कादेश एव पूर्वस्य साधुत्वं। एतेन लृकारद्वय
वतिगमॢकार इत्यादौ वर्णितार्थमुत्तरवचनं होत्लृकार इत्यादौ न प्रवर्त्तेति तिपरास्तं। होत्लृकार इति
भाष्योदाहरणाच्च। स्थानेंतरतम इति सप्तम्यंतपाठस्य भाष्ये प्रत्याख्यानाच्च। ईषत्स्पृष्टं विमो॥ विवृतत्वे
हि विवृततरऋकारलृकाभ्यामनयोरपि ग्रहणेऽकः सवर्णे इत्यनेनैव सिद्धो एतद्वार्तिकद्वयस्योक्ति संभ
वन्न स्यात्। एतयोरष्ठ उपसत्वानंतरं पठनस्य भाष्योक्तस्यासंगतिश्च स्यात्। न च यः कश्चिदेव प्रयत्नोस्तु रम्
इति वाच्यं। उपस्थिततरे फीयप्रयत्नत्यागे मानाभावात्। एतेन संवृतत्वमर्द्धतृतीयमात्रत्वं च षाष्ठकैय

टोक्तमयास्तं। एवं चाकोकीत्येवास्तु। यथासंख्येनैव सिद्धेः। न च ऋवेत्युत्तरवार्त्तिकद्वयेऽनुवृत्त्यर्थं
स्तवर्णइत्यावश्यकं। व्यवस्थितविभाषयैव दध्यकारादौ तदप्रवृत्तिसिद्धेः। अकाराद्वितीकारादीनां क्र
मेणोपस्थितत्वाद्यथासंख्यसूत्रस्य प्रवृत्तेः। संज्ञाशब्दपरस्मैपदभ्रांणालित्यादौ भाष्यसूत्रांतरस्थ
क्रमग्रहणात्। तथा चावशब्देनाकाराद्यष्टादशाभेदोपस्थिः सनंतरमिकाराद्यष्टादशाभेदोपस्थि
तिः। तद्वाच्यवाच्यत्वेन लक्षणामपि अकारककारयोराद्यंतत्वज्ञानाय अइउणित्याद्युपस्थितेरा
वश्यकत्वेन सूत्रांतरस्थक्रमानुरोधेन च तथैवोपस्थितेरुचितत्वात्। अष्टादशाभेदेषु परं न क्र
मेणोपस्थितिः। तेषां क्रमेण कश्चिदप्यपागत्। न च ह्रस्वदीर्घप्लुत इति क्रमेणैव संज्ञाकरणात्ते
षां तेनैव क्रमेणोपस्थितिरुचितानुल्यास्येति सूत्रनिर्देशेन तत्क्रमस्य नियामकत्वानाश्रयणात्
अत एव प्रतीशारइत्यादौ दीर्घसिद्धिः। अत एव सप्यंते त्यादौ निरनुनासिके सानुनासिके चाद्वा

लोपङ्क्तौ भाष्यकृता जातिपक्षे तु क्रमोपस्थितिः स्पष्टैवेति दिक् । सर्वत्र विभाषा गोः । प्रकृत्यान्त इति सू
त्रात्प्रकृत्येत्यनुवर्त्तते । अत्र पाठे शाकल्यसूत्रे ह्रस्वश्चेति चेन प्रकृत्येत्यनुकृष्यते इति भाष्यं । इकोगु
णेति सूत्रस्थभाष्यसंमतनान्त इति पाठे तु अनेन सूत्रेण गोशब्दस्य पदस्य प्राप्तं तन्नेति व्याख्यानेनना
न्तरे इत्यत्रैव पूर्वत्वादिकं विस्पष्टेन निषिध्यते इति वोध्यं । अत्र पाठे तु न प्रगृह्यादित्यादावध्याहारेणा
न्वयक्लेशः । न च प्रकृत्येत्यनेन गोरिति षष्ठ्यन्तमन्वयायोग्यमिति वाच्यं । अवस्थितमित्यध्याहा
रेणादोषात् । अवङ् स्फोटायनस्य । अत्राप्येडं तस्य गोरित्यादि आक्षेपे यं । ननु नित्याः शब्दाः शा
स्त्रं वेदं साधुत्वमात्रं विधायकं । गोशब्दे एकारात्यरोचिपरेऽवङ् साधुरित्याद्यर्थः शास्त्रार्थः एवं
च प्राधान्यमिदमवङः साधुत्वं स्फोटायनेन स्वीकृतं न सर्वैरिति स्मृत्यंतरानुसंधानुद्वारेण तस्यैव वि साम० १०
कल्पापत्तिरिति गवाग्रमित्यवङ् भावोनुचित इति चेन्नः साधुत्वस्यापौरुषेयत्वयाऽविकल्प्यत्वे

नावङादीनां स्मृतत्वेन चलङादिषु प्रयोगास्तम्भवाप्येषु स्मृत एव संबंधस्य कृतत्वेन स्मृतावङादिति
रेव संबंधेन तदुपपत्तेः॥ स्फोटायनोवङः स्मर्त्तोऽन्यस्तु तदभावस्येति स्मर्त्यंतरानुसंधानद्वारेण वि
कल्पसिद्धिः कार्या॥ शाब्दा इति मते तु तस्मिन्ध्येतः न हि तन्मते स्फोटायनेनावङ्कृतोऽतः कर्त्तव्योऽन्यो
ऽन्येन न कृत इति न कर्त्तव्य इति स्मर्त्यंतरानुसंधानेन विकल्पो व्याख्यातुं शक्यः॥ अन्येनोत्यादित्तस्य
पुनरुक्तत्वानायोगात्‌ पाणिनिकृतकार्याणामप्यन्येनाकरणात्सर्वत्र विकल्पापत्तेश्च॥ अन्येना
पितेषां कृतत्वे तु पाणिनिशास्त्रे कार्यशब्दत्वस्य हानिरेव: देवदत्तेन घटः कृतो न विष्णुनेत्येता
घटोत्पत्ते विकल्पापत्तेर्नवेति विभाषेत्यत्र भाष्ये स्पष्टं॥ न चैवं साध्वनुशासनत्वभंगः शब्दानां
सिद्धत्वेन शास्त्रवैयर्थ्यापित्यामतिप्रसंगे मार्ज्जिः साधुर्भवतीत्यादि वृद्धिसंज्ञादिसूत्रस्थभाष्या
दिप्रामाण्येन च यदिह परिनिष्ठितत्वेन ज्ञाप्यं तत्साधुत्वमर्थापत्तिकल्प्यवाक्येन तत्सिद्धिरित्याहुः॥

गवाग्रमितिन्न च संनिपातपरिभाषया दीर्घो न स्यात् अत एव स्त्रीवाचकगोशब्दे न समासे जाते
रस्त्रीतिङीषू तेतिवाच्यं भाष्यादिप्रामाण्येन एकादेशे तदप्रवृत्तेः। चुत्र गत्साइत्यत्र लृत्येतिपाठ एव
सामंजस्यमिति ध्वनयन्नाह॥ अयप्रकृतीति॥ एतेनायं ग्रंथः सर्वत्रेति सूत्रात्सर्वमेव वक्तुं इत्यपास्तं
इकोऽसवर्णे शाकल्यस्य ह्रस्वश्चावेति। यत्तु शाकल्यग्रहणमुत्तरार्थं। ह्रस्वयणोर्विधानसामा
मर्थ्यादपि पर्यायसिद्धेः सवर्णे चिदीर्घविधानेनासवर्णे च एव यणादेशविषयत्वादिति। तन्नः
अपदांते यणश्चरितार्थत्वेन पदांते ह्रस्वप्रकृतिभावयोरपवादत्वापत्तेरित्याहुः। सामर्थ्यादेवेति॥
एवकारोऽवश्यापेक्षयत्नीयतामस्य सूचयति। चकारेण प्रकृतिभावानुकर्षणेऽपि क्रत्यकइत्य
त्र तदनुवृत्तिर्न स्यात्। चानुकृष्टत्वात्॥ तदर्थं ह्रस्वविधानसामर्थ्यावश्यकत्वे चकारो व्यर्थ इति राम॰ ११
भावः। भाष्ये स्थितमिति॥ न च ह्रस्वस्य वैकल्पिकतया ह्रस्वाभावे प्रकृतिभावार्थं चकारः। तेन

चक्री अत्रेत्यादिसिद्धिः॥ प्रकृतिभावस्यापि वैकल्पिकत्वात्पक्षे च अत्रेत्यपीति वाच्यं॥ इकोऽसवर्णे शाकल्यस्य॰
ह्रस्वः इति सूत्रे ह्रस्वकरणेनैव सिद्धे चकारस्तथापि विधेयः स्यात्॰ किं च भाष्यप्रामाण्यात् ह्रस्वाभावे प्रकृति
भावः। चक्री अत्रेति तु संहिताया अविवक्षायां बोध्यं॰ चानुकृष्टस्यात्र तत्रासंबंधान्नोत्तरसूत्रवि
षयेपि कल्पनमिति बोध्यं॰ एवं च विश्वपक्षर्षीणामिति भाष्यविरुद्धकल्पनापेक्षया सामर्थ्यसिद्धार्थानुवा
दकः अकारः इत्येव स्वत्रायस्य वक्तुमुचितत्वात् तच्च क्रियतेति॰ ह्रस्वो रिति लोप॰ यणः कार्यकालपक्षेव
हिरंगासिद्धत्वात्॰ पूर्वत्रासिद्धेनेत्यस्य तस्य दोष इति निषेधेन स्थानिवद्भावाच्च॰ न समासे इति॰ अत्र
चत्तापकं इको यणो व्यवचिद्यथास्यादित्यर्थकमित्याहुः। अन्यथा ह्रस्वदीर्घपदानुवृत्त्येव व्यंजनत्वात्
ति सिद्धेः॰ प्लुतस्य तु प्रकृतिभावादेव व्यावृत्तिः। अवर्णे नित्यं च पयाप्य थमयवायावां दीर्घस्य गुणस्य
स्वबाधकत्वं तद्देपर्य्यं स्पष्टमेव॰ अप्लुतवद्भावे तु प्लुतत्राभ्यस्य पर्युदासवृत्त्या ह्रस्वदीर्घपरत्वेन तत्का।

१२ यातिदेशात्प्लुतस्यासिद्धत्वाच्चासिद्धमिति भावः। एतेनासिति च नेत्यपि मारख्यातं आर्छदिति। आटोपात्ववय
12 वत्वेनापदान्तत्वादिति भावः। यत्त्वार्छदित्यत्राटश्चेति पुनर्विधानार्थेन वकारेणोस्योमाङ्‌क्षुपररूपबाधवत्स
वृद्धिभावस्यापि बाधेनेष्टसिद्धौ मर्थ्यपदोता इति। तन्न अनंतरस्येति न्यायेन पुनर्वृद्धिविधानं पररूपमात्र
बाधनार्थेन वकारे कत्वात्। ईषदसमाप्त ऋच्छको बह्लृच्छक इत्यादेर्भाववर्तस्यसत्वाच्च समासेपीति। पूर्वो
क्तज्ञापकपरस्माप्पप्रावाप्यासिसाहचर्याच्च न समासे इत्यस्य पूर्वसूत्रमात्रमनिषेधकत्वात्। प्रत्यभि
वादेऽशूद्रे शूद्रे। प्रणमादिभिराशिषं वाच्यमानो गुर्वादिर्यदाशिषं प्रयुक्ते स प्रत्यभिवादः। तत्रैव प्रसिद्धत्वा
त्वा दि तात्। अशूद्रे इति सप्तम्यर्थो विषयत्वं। तथा च शूद्रभिन्नविषयके आशीर्वादे इत्यर्थ इति हरदत्तादयः।
यथा तु भाष्यं तथा प्रतिसंभाषणमात्रं प्रत्यभिवाद इति प्रतीयते। तथा च भाष्यं। अशूद्रे इति किमर्थं कुश तम॰ १२
लोसि तुषजक इति। अशूद्रे आशीर्वचनरूपप्रत्यभिवादाभावेनाशूद्रे इत्यस्य वैयर्थ्यापत्तेश्च। ध्वनितं

चेदं कैयटः। तस्मादाशीर्वचनरूपं कुशलादिप्रश्नरूपं वाऽभिवादयितर्यर्थं तु यत्स्वद्योतकं वाक्यमात्रं प्रत्यभिवा
दनमाहेतोच्यतेऽस्याकुः। एधीति यत्वायुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादन इति मनूक्तेरेधीति प्रयो
गास्थितत्वय इति· तन्न· तत्रभवेत्यस्यार्थपरत्वादित्याकुः। स्त्रियां नेति· ये तु स्त्रियान्नाम्नाभिवादनं प्रत्यभिवा
दनेऽप्युहुं तिन्नस्मतेनायं निषेधः। इदमेव भाष्यसंमतं· येषां तु तस्याभिवादयते पादोपसंग्रहणमेवक
रोति· येषामप्यभिवादयस्ते ननु स्वनामग्रहणान्ति· एवं च प्रत्यभिवादे पितदभोतेनायं निषेधो। इदमे
(व भाष्यसंमतं· येषां तु न स्यादभिवादयते पादोपसंग्रहण)ऽनर्थकस्तस्यानयन्नाह। नामगोत्रे वेति· इदं
न्यायसिद्धं। अभिवादनं तावन्नामगोत्राभ्यामेव· असौ नामाहमस्मीति स्वं नाम परिकीर्तयेदिति मनु
स्मृतेः। अत्र नामपदं गोत्रस्याप्युपलक्षणं। प्रत्यभिवादनं च प्रागुक्तमेव· प्लुतस्त्वधिकृतस्य पदस्येस्स
स्य प्रत्यभिवादेऽप्यभिवादेऽस्त्यनेन विशेषणेनास्यास्तिन्यायाच्च प्रत्यभ्युद्यमानार्थवाचकस्यैव·

किंचाभिवादयितुरनुग्रहार्थत्वात्प्रत्यभिवादस्य संस्कार्यत्वाच्च प्राधान्येन तद्वाचकस्यैव प्लुतः स्पष्टं·चेदं
भाष्ये· एवं च तस्य वाक्यांतत्वमावश्यकं। तत्र च नामपदेन न बोधकमात्रं· किंतु द्वादशेऽहनि पिता नाम कु
र्यात् अयं द्व्यक्षरं चतुरक्षरं वेत्यादि शर्मांतं नाम ब्राह्मणस्य वर्मांतं क्षत्रियस्येत्यादिश्रुतिस्मृत्याद्युक्तमि
ति बोध्यं· भो राजन्योऽसि· भोः शब्दस्य नामगोत्रत्वादप्राप्तेर्दत्वयोस्तु नात्वाप्राप्ते विभाषेयं· अत एव भा
ष्यकृतापि भोः शब्दस्य नामगोत्रत्वादप्राप्तिं मत्वा सर्वस्यैव नाम्नः प्रत्यभिवादे भोः न्याइत्यादिनोक्तं शा
र्मादीनां नाम्न्यंतर्भाव एव· अत एव शर्मांतदेर्नित्यं प्लुतसिद्धिः शर्मांतं नाम ब्राह्मणस्येत्यादौ तद्गुणसं
विज्ञान बहुव्रीहिः। अंतशब्दस्यावयववाचीति न दोषः। दूराद्धूते च· दूरादाह्वानं च दूरात्संबोधन
मात्रोपलक्षणं। एवं चासत्यप्याह्वाने भवति· तत्कलं मारु॰ सक्तून्नित्यादि॰ अत एवातो रोरिति सूत्रे सु रामु॰ १३
श्रोता३ अत्र त्वमसीत्युदाहृतं· अत्रापि द्रुते इत्येतदनुवृत्तस्य पदस्येत्यस्याविशेषणं· तेन हूयमाना

र्थवाचिनः पदस्यैव टेः प्लुतः। पदं चाविशेषात्सित्रादिसंकेतितं प्रकृतिकं पाचकद्वाद्ध्रदिप्रकृतिकं चेत्याहुः।
ध्वनितं चेदं भाष्ये। हे३ प्रयोगे हैहयोः। एवं च गृह्यमाणार्थस्य पदस्य वाक्यांतस्य टेः प्लुतविधानादीदृशाद्यो
नं प्राप्नोतीति वचनं। अयं च गृह्यमाणार्थपदटेः प्लुतस्य बाधकः। तक्रकौण्डिन्यान्यायात्। तदेतत् ध्वनय
न्नाह। हे हयोरेवेति। गुरोरनृतोनंत्यस्याप्येकैकस्य प्राचां दूराद्धूते इति। दूरत्वं चात्र विवक्षितं। तेन प्रत्यभि
वादिभो राजन्य दूराद्धूते इत्येतद्विषयेप्यस्य प्रवृत्तिः। तद्विषये प्लुपलक्षुबोधनसत्वात्। अनुदात्तं प्रश्नांते
त्यादिभिस्तुल्यत्वाद्वानुदात्तत्वादिगुणमात्रं विधीयते न तु प्लुतः। प्लुतस्तु दूराद्धूते इत्यादिभिरेव। अत एव वचि
दिति चापमार्थे इति सूत्रे प्लुतसमावेशार्थश्चकारः सार्थकः। एवं च पूर्वसूत्रद्वयस्यैव शेषायमिति फलि
तं। तदेतद्धृन्नोपपद्यते। क्वचित्प्रत्यभिवादे दूराद्धूते चेत्येवमादिना यः प्लुतो विहितस्तस्यैवायं स्थानि
विशेषधनेरिति प्रकृतसूत्रेण न प्लुतो विधीयते किंतु दूराद्धूतादिषु विहितस्य प्लुतस्यानुदात्तत्व

॥१४॥ गुणमात्रंविधीयतेइतिअनुदात्तंप्रश्नान्तेतिसूत्रं·आद्दिनाभोराजन्येत्यस्यसंग्रहः॥सर्वप्लुतप्रकरण
14 स्यतुनशेषः॥तथाहिसतिवाक्यस्यटेरित्यनेनसहैवास्याधिकारत्वमेवकुर्यात्·एचोप्रगृह्यस्या
दूराद्धूतेपूर्वस्याईस्याद्धूतरस्येदुतावित्यनेनाप्याकारःप्लुतविशिष्टएवविधीयते·एतेनतदुदाहरणम्
तेविचार्यमाणविषयेहोनध्वदीक्षितस्यगृहाउइइत्यादौतद्धितपूर्वाधिकारस्यप्लुतोनस्यात्·यतोऽदूरा
द्धूतेइत्युक्तत्वेनदूराद्धूतेऽस्याप्रवृत्तिः॥अदूराद्धूतेचप्लुतोदुर्लभइत्यपास्तंसचप्लुतआकारःप्रश्नान्तादिवि
षयेऽनुदात्तादिगुणकएव·प्रश्नान्तासेय·प्लुतःसोऽनुदात्तगुणकइत्यादिर्थात्·यत्त्वत्रगुरोरितिप्लुतः॥आ
कारमात्रस्यैवप्लुतेनविधानमिति·तन्नअदूराद्धूतविषयेतदप्राप्तेः॥गुरोरितिसूत्रेदूराद्धूतेइत्यस्यासंब
न्धेतुसर्वत्रप्लुतापत्तेः॥इदुतोरपिपर्यायेणप्लुतापत्तेश्च·उदाहरणंव्याख्यानादिदुतोःप्लुतस्यचवि साम० १४
शेषणं·प्लुतपदं·वाकारेणैवसंबध्यते·व्याख्यानादितिबोध्यं·अनंत्यस्यापीति·अपिशब्दादंत्यस्यगुरोर

गुरोर्भवेत्यर्थः। अत एव सूत्रे गुरोरिति अनंत्यस्यापीत्यस्यायेन पठितं। तनुक्तं तन्नियेत्यत्र प्लुतो न स्यात्
अन्त इति निषेधात् इति चेन्न। ऋत्स्वरगी तिसूत्रे भेदेन निर्देशेन सावर्ण्यानित्यत्वस्य ज्ञापनात् ऌकारा
दिप्रयुक्तकार्यस्य क्वचित् ऌकारादावप्रवृत्तिज्ञापनाद्वा अप्लुतकार्यमिति यत्तु प्लुतकार्यं न भवतीत्यर्थः
। अत एव वृत्तावुक्तं। अप्लुत इत्युक्तेऽप्लुत एव निषिध्येतेति जातस्यापि तेनापादितेव निवृत्तिरिवातितदाशयः
पर्युदासे हि अग्नी३ इती त्यादौ प्रगृह्याश्रयं प्रकृतिभावं बाधित्वा परत्वात् प्लुतवज्ञावेन दीर्घादिकं न स्यात्
इति। तन्न। वाक्यभेदासमर्थसमासापत्तेः। प्लुतवदित्यनेन प्लुतकार्यमित्यर्थस्य शाब्दमर्यादयाऽलाभा
च्च। प्लुते प्लुतसादृश्यस्यासंभवेनासाधुतापत्तेश्च प्लुतेः प्लुतसादृश्यविधानौचित्याच्च। वृत्तिस्तु चिंत्येवं
शक्तवंतमित्यादिन्यायविरोधाच्च। अत एव विधीयतेत्येव पाठः। अग्नी३ इती त्यादौ च शास्त्रातिदेशाश्रय
णान्न दोषः। प्रकृतिभावस्य निषेधफलकत्वेन निषेधाश्चयस्तोयां सो भवंतीति न्यायेन परमपि बा

15 धित्वा प्रगृह्याश्रयप्रकृतिभावस्यैव प्राप्तेश्च । अप्लुतवद्भावस्येति शास्त्रसामर्थ्यात्त्वेन तद्द्वयेऽत्यया प्रकृतिभा
वर्णमात्राये त्त्वेनांतरंगत्वाच्च । वृते प्लुतस्थाने ऽप्लुतस्य विधानेन स निवर्त्तेतेत्यर्थ इति दिक् । नन्वीदू
तीति । नन्वात्र प्लुतस्य प्रगृह्यत्वं दुर्लभं तत्रादीर्घाणामेव ग्रहणेन तेषां चानण्त्वेन सवर्णाग्रहकत्वा
दिति चेन्न । प्लुतस्यासिद्धत्वात् । न च प्लुतप्रकृत्येति ज्ञापकात्स्वरसंधिप्रकरणे प्लुतस्य सिद्धत्वं प्रकृ
तिभावं प्रत्याश्रयासिद्धत्वे नैवरोक्तत्वेऽवतदुपस्तौ स्वरसंधिप्रकरणे ऽसिद्धत्वे मानाभावात् । एवं च
प्रगृह्यसंज्ञां प्रति प्लुतस्यासिद्धत्वेन त्रिमात्रे ऽपि द्विमात्रकबुद्ध्या प्रतिघातात्सिद्धासंज्ञानुकार्ये अनुकर
णे तु प्रकृतिवदनुकरणमित्यतिदेशात् । न चैवमपि प्लुतस्यासिद्धत्वे प्लुतात्पूर्वमेव प्रगृह्यत्वप्रवृत्तौ त
तः प्लुते कृते त्रिमात्रं द्विमात्रत्वेन प्रत्यपं स्यात् अपि संज्ञायाः पुनः प्रवृत्तौ बीजाभावेनासिद्धघित्वात्स्थानिव राम० १५
वद्भावस्य दुर्लभत्वं अन्यत्वेन चाग्नी३इत्यादौ प्रगृह्याश्रयप्रकृतिभावो दुर्लभ एवेति वाच्यं संज्ञायाः कार्या

देशोऽनुपपन्न इति चेत्स्त्राहुः उद्देश्यप्रतिनिर्देश्ययोरैक्यमापादयत्सर्वं नामपर्यायेण तत्तल्लिंगभाग्भवति प
यागस्त्वमिति सूत्रे कर्मकारकपरामर्शेऽपि तच्छब्दः सकर्तृत्विवाक्यविधीयमानकर्तृलिंगभाग्भवतीत्याहुः
स्वार्थ इति। सत्यमासामाइत्यर्थे सत्वाभामेतिवदिवार्थे वार्थे वचनाद्। ननु समुदायस्यैव तत्र शक्तिग्रहात्कथमव
यवात्तद्बोध इति चेन्न। अनुमित्यादिनावयवानामपि समुदायशक्तिग्रहकाले शक्तिग्रहान्न दोषः। न चैव
नद्या ब्राद्यपि भीमसेनबोधापत्तिः। व्यवहारस्य शक्तिग्राहकतया तत्र च व्यवहाराभावेन तेषां शक्त्यग्रहात्तु
मानात्। एवं चैकदेशेन समर्थमात्रेण समुदायादर्थबोध इति। तन्न। एवं हि कुम्भारिपदस्य हस्त्याद्यर्थबोधकत्वा
भावेन प्रातिपदिकत्वाभावात्तदुत्तरं विभक्त्युत्पत्त्यनापत्तेः। तस्यार्थे दत्तादिपदोत्तरविभक्त्यर्थान्वयाप
पत्तेः प्रत्ययत्वे। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात्। तथानुभवाच्चेत्याहुः। तत्र पूर्वोत्तरपद
योर्विनापि प्रत्ययं लोपो वाच्य इति वचनेन स्वखंडस्य लोपेन तथा कल्पनेऽप्यखंडपदे तत्कल्पने मानाभावात्।

७ तस्मादित्यादिसूत्रं तत्रो निपात इवार्थक इत्यन्ये इति दिक् । एवं च अमी आदीनां प्रतिषेधो वक्तव्य इति भाष्यात्तु
क्तसात्रयोगाण्णमन्यथासिद्धस्याप्रामाणिकमिति भावः । अदसो मात् । इहेकारो नानुवर्त्तते । असंभवात् ।
तदाह । ई ऊ तावित्ति । रामकृष्णावमू आसाते इति । ननु आसाते इत्यादिपदांतरसंबंधात्सर्कर्मं समंगत्वेनजा
तयोरप्युत्वमत्वयोरसिद्धत्वाद्ह्यादीनां दुर्वारता । किंचोत्वादीनामसिद्धत्वे प्रगृह्यसंज्ञाया अप्रसंगः । नन्चो
रत्तोसेरित्युत्वं प्रत्याश्रयात्सिद्धत्वमिवोत्वादीनामप्यत्राश्रयात्सिद्धत्वमिवोत्वादीनामप्यत्राश्रयात्सिद्ध
त्वं भविष्यतीति वाच्यं । तत्रोत्वशास्त्रस्य वैयर्थ्यापत्त्याश्रयात्सिद्धत्वेपि प्रवृत्ते कार्यकालपक्षे संज्ञाया अनु
नासिकप्रतिषेधे चारितार्थ्येनाश्रयात्सिद्धत्वे ज्ञानाभावादिति चेन्न । अनुनासिकवि[illegible]धाव प्रगृह्याद् अस राम०
इत्येवसिद्धे प्रकरणोत्कर्षेण सामान्यसत्तास्तत्र करणसामर्थ्यान्न प्लुतप्रगृह्या इत्यत्राप्युपस्थित्या तस्य ७
मर्थ्यं नासिद्धत्वाबाधात् । हे अमुक अमुका इत्यादौ व्यवस्थितविभाषाश्रयणात्तत्र मतेपि नानुनासि

कः॥ ध्वनितं चेदं भाष्ये॥ केचित्तु अदस इत्यावर्त्यं न विद्यते दस्य स्थाने मो यस्य तस्मादस्मादसः त्यपेनानुनासि
को भाष्यमतेऽपि भवत्येवेत्याहुः॥ निपात एकाजनाङ्॥ निपात इति किम्॥ अकारो वासुदेवः॥ हे अ इदं पश्य
एवं च काराग्रेष्वपि प्रत्युदाहरणं बोध्यं॥ न चानाङिति पर्युदासाश्रयवत एवाचो ग्रहणान्मात्रदो ष इति वाच्यं
प्रत्ययस्यापि शास्त्रकल्पितार्थवत्वात्॥ आङ्वर्जमिति॥ एतेन पर्युदासोयमिति ध्वनयति॥ अन्यथास्स
मर्थसमासत्वात्कर्मभेदयोरायत्तिः स्यादेवं चाकाभेदाभावायैव एकाजनाङिति नास्त्रि॥ यत्तु नायं पर्युदासः किं
तु प्रसज्यप्रतिषेधः॥ आङ् ओरित्यत्राङ् नाङोरेकादेशस्यानाङिति प्रतिषेधे मा भूत् प्रतिप्रसवाय ओदि
ति सूत्रमित्यर्थकं न प्रतिषिद्धार्थोऽयमारम्भ इति भाष्यग्रन्थे तद्बोधितत्वात्॥ पर्युदासत्वेनैव सिद्धौ भा
ष्यासङ्गतिः स्यादेवं॥ अनाङिति पर्युदासेनैवाजुपलक्षितत्वे निपातत्वे॥ न च लक्ष्ये एकाच्त्वस्य निपातपदस्य च
वैयर्थ्यापत्तिश्च फलविशेषाभावात्॥ तथाहि॥ वासुदेवादिवाचकअशब्दस्याङा सह अव्ययीभावे आ आत्॥

आरतः एतदिति रूपं प्रसज्यप्रतिषेधपक्षे। तस्य पूर्वान्तवत्त्वेन वाङ्त्वेन प्रतिषेधात्. पर्युदासपक्षे तु स्वतन्त्रा
18 ङ्ङिन्त्वेन तु सञ्ज्ञानिकत्वेन [illegible]निपातत्वाच्च प्रगृह्यत्वं दुर्वारमेव. परादिवत्त्वे नाङ्ङित्त्वं तु नञर्थ्यां अत्राश्रीयत्वा
त्इति। तन्न. अहो भवदित्यादि ऽर्थप्रतिपदोक्तौ कास्य न तु एतस्य भाष्यकृतैवोक्तत्वेन निपातसमुदायेनि
पातत्वाभावेन च ओ आवुयात मित्यत्र ओ दित्यस्याप्राप्तेः आ ऋतु उत ताहो इत्यादेरखंड इति पातत्वपक्षस्यापि
भाष्येउक्तत्वात्. पर्युदासेपि गम्यप्रतिषेधस्य सत्त्वेन प्रतिषिद्धार्थ इति भाष्यापपत्त्यभावाच्च तस्माद्यव
तर्कसहितपर्युदासस्यागो मानाभावाच्च. आङः स्य पूर्वान्तवत्त्वेन तिदेशो ऽति दिश्यमानधर्मविरुद्धस्याश्रय
धर्मप्रयुक्तकार्यस्य निवृत्तेरति देशस्वभावसिद्धत्वेनाङ्ङित्त्वाभावात्पर्युदासेपि एतदित्यादो दोषस्य भावा राम॰
च्च. विधिनिषेधयोरेकवाक्यतायामप्राप्त्यनुमानमेव बाध इति क्ङिति चेत्यादि सूत्रस्थ भाष्ये केगपुकारी १८
त्या एकवाक्यतायाः पर्युदासविषयैव वक्तव्यतया तस्यां च सत्यां वदुकारीत्या सार्वधातुकमपिदित्या

ह्यतिदेशविषयेसुसाद्या पत्याप्रसज्यप्रतिषेधपर्युदासयोरेवंजातीयकफलविशेषस्यमदुक्तरीत्याकार
णंसर्वैषामभावरूपकं।अनाङितिपर्युदासादेवनिपातेलब्धेनिपातग्रहणमुत्तरार्थमभावरूपकंस्पष्टप्रति
पत्त्यइदेवकृतं।एकाज्ग्रहणंतुएकाच्प्रतिपातमात्रस्यप्रगृह्यत्वार्थंतिनगोरणाभीभवदित्यादौसंज्ञा
सिद्धिःअतएवच्कृतस्यप्रतिषेधइतिवचनमोसूत्रेएववार्तिककृतारब्धं।एकाच्प्रकृतिकोच्।तना
मनभिधानेतुस्पष्टार्थमेव।स्वांगसमुदायेस्वांगत्वाभाववदचसमुदायेच्त्वाभावादङित्येवाचसमुदा
यग्रहणाभावेसिद्धएकग्रहणमन्यत्रवर्णग्रहणेजातिग्रहणार्थं।यत्तुकैयटेनासमुदायग्रहणाकां
तिरासार्थं।अन्यथाअइउअयेस्यत्रसमुदायेकाज्द्विर्वचनवत्समुदायस्यैवप्रगृह्यत्वंस्यान्नावय
क. वानां।सिद्धांतेतुतत्रैकौङित्यान्यायान्नित्यत्वात्प्रगृह्येपिपरत्वेकृतिभावइतितन्न।समुदायसंज्ञया
ऽवयवानामननुग्रहात्।उक्तरीत्यानिपातसमुदायस्यनिपातग्रहणेनाग्रहणेनाग्रहणाच्च।वा

१५

कथ स्मरणयोरिति । वाक्यन्नाऽऽदेनवाक्यार्थगतमन्यथात्वमुच्यते । अन्यथात्वं चानभिमतत्वमेव । पूर्वोदाह
रणस्य पूर्वमेवं नासंस्मृत इदानीमेवं मन्यसे इत्यर्थः ॥ द्वितीये हि विस्मृतस्य स्मृतिविषयताद्योत्यते । एवं कि
लतद्विशः । एवं चेतोन्यत्राङि इत्यर्थादुक्तं भवति । तदुक्तं भाष्ये । ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् इति मर्यादाभिविधाविषयत्वमस्मा आ हरहं हे आगमशास्त्रस्या
नित्यत्वान्नुमभावः । संबुद्धौ शाकल्यस्येतावनार्षे । अनार्षे किं । ब्रह्मबंधवित्यब्रवीत् । अवस्तुतोवे आपाद्य
रूपाभावासिद्धरूपस्य च विकल्पप्रवृत्तावपि सिद्धत्वाद्धर्यमनार्षग्रहणमित्याहुः ॥ नन्विदं सूत्रं
व्यर्थं संहितायामविवक्षायां विश्लेषाद्दीर्घत्वस्य सिद्धेः । समासे तस्याप्रवृत्तिरेव । तत्राहि सुब्लुकि तन्नि तु
मित्तोकाराभावात् । संबुद्धं तेन प्रायः सामान्याभावाच्चेति चेन्न । अर्धमात्राकालस्य वर्णोच्चारणेनियत राम १९
त्वेन तदधिककालमवायाभावः संहिता । तस्या अविवक्षा नाम तदधिककालव्यवायेन वर्णनामुच्चा

रणे विवक्षा· आधिकः कालोपि न पर्येषु किं त्वर्धमात्राकाल एव· अत एव मुहूर्तादिव्यवधानेन साधुत्वं ना
प्यर्थबोध इति वक्ष्यामः एवं च मात्राकालव्यवाये संहितायां अविवक्षणे न साधुत्वे सिद्धे अर्धमात्राकालव्यवा
ये नोच्चारणेऽवादीं रहितप्रयोगार्थस्तत्र स्यात्करूपकत्वात्· न चैवं मयूरस्रो प्रभृतित्यादावव्यवग्रहे संहिता
नित्यत्वव्याघातः इष्टापत्तेः· अवग्रहणविशेषविहिते नखविषये संहितानित्यस्य बाधात्· वर्णोच्चार
णे स्वाभाविकार्धमात्राकालापेक्षयाऽधिकोऽर्धमात्राकालो ह्यवग्रह इत्याहुः॥ ऊँः॥ ऊँ अत्र निपात एकाज
नु प्रत्याहारः॥ अज्ग्रहणसामर्थ्यात्· अन्यथा ह्युविशेषाभावादज्ग्रहणमेव कुर्यात्· उञ्ञिपा
न तेज कारोच्चारणसामर्थ्यात् अ ओँ ऊँ इत्येकस्त्वे तु प्राक्स्पग्रहणानुवृत्तौ ऊ इतीत्येकमेव स्यात्
प्रगृह्यसंज्ञायुक्तरणे पाठेन तद्विशिष्टस्यैव विधानात्· स्थानिवद्भावेन निपात एकाजिति प्रगृह्य
त्वाद्य· उ इति विती ति च न स्यात्· तदनुवृत्तौ त्वादेशाभावे निपात एकेति प्रगृह्यत्वेन उ इतीति सिद्ध

20 वपिवितीतिनस्यात्। नचउइतीतिरूपस्यानिरनुबन्धकोकारप्राप्तायसिद्धः। त्वेनशाकल्यानुवृत्तिसाम
र्थ्यात्स्यन्देवितीतिभविष्यतीतिवाच्यं। उइतीयतः सानुबंधकबोधस्यापीष्टत्वेनतदनापत्तेः। किंचमयः परत्वे
किम्वितीत्यादौमकारसहितवकारघटितरूपानापत्तिः। तदनुवृत्तिसामर्थ्यान्निपातेतिप्रगृह्यत्वाभावे भा ३
पिमयइतिवत्वासिद्धत्वेनैकोपपत्तेश्चानिवत्वेनुस्वारापत्तेः। यद्वानेनप्रकरणेऽस्मिन्प्रगृह्यसंज्ञस्यऊआदे
शस्यविधानेनास्यनिपातइतिप्रगृह्यसंज्ञापवादत्वादेतदादेशविकल्पेऊँइतिवितीतिसिद्ध्यतिननु
उइतिऊँ। अत्रयोगविभागदीर्घोच्चारणानुनासिकोच्चारणादेशविधानंसामर्थ्याच्छाकल्यस्येतौप्र
गृह्यमित्यनुवर्त्तते। यत्तुउभयासंबंधेप्रगृह्यपदमात्रासंबंधेवाप्रगृह्यत्वाभावेऽस्मात्रस्यादेशा रामः २०
पत्तिरुक्ता। तच्चिंत्यं अर्थाधिकारस्योचितत्वात्तदासुःउअरइतोदीर्घोनुनासिकेत्यादि। मयउओवोवा
मयत्रमारमानात्मत्यासारएवनतुधातुस्तुध्वनयन्नाह। किमुक्तमिति। नानुस्वारइतिप्रगृह्य

संज्ञाऽभावेवत्वस्यासिद्धत्वाद्याद्विदिको यणश्चीतियण एव नुस्वारो भवत्येवं बहिरंगासिद्धत्वं तु न ॥ प्लुतप्रग
ह्याद्यस्यानंतरं मयउञोवेति पठितमेत्रिपाद्यामितत्सूत्रकरणात् ॥ न चैकोयणित्यनंतरं तथान्यासेपि
संनिपापातपरिभाषयाऽनुस्वारो दुर्लभः ॥ तदानेन प्रकृतिभावबाधे बोधितेऽकरत्यनेन यणि प्राप्तेऽस्य
प्राप्तविभाषात्वेनाभावे एवतात्पर्ये एवस्यतस्संनिपातलक्षणत्वाभावात् ॥ अनुस्वारस्यासिद्धत्वेन संनि
पातविघातोऽभावोयुक्त इति केचित् ॥ तन्न ॥ पूर्वत्र कर्तव्येऽसिद्धत्वेपि कृते तस्मिन्यरस्यासिद्धत्वलाभात् ॥
किंचातिदिष्टिक संनिपातविघातोऽभावमादायैतत्प्रवृत्तौ गोरीत्यादौ संबुद्धिलोपेपि स्थानिवत्त्वेन ह्रु
स्वनिमित्तविघाताभावात्तत्रैतस्याः अतिव्याप्तिः परिभाष्यासंगतिः ॥ संनिपातस्याश्रयस्त्रीयत्वात्तत्र स्थानि
वत्वमिति चेत् ॥ असिद्धत्वस्यापि कथमश्रयस्त्रीयि प्रवृत्तिरिति तुल्यं ॥ अश्रयस्त्रीयेऽसिद्धत्वाप्रवृत्तिरपी
हृस्वस्यकेयरेनस्यष्टमुक्तं ॥ तस्याद्यादित्रिपादीस्थेसंनिपातपरिभाषाप्रवृत्तिर्नेष्टा तर्हि नित्यत्वादेव

११

इं०श्री०

२१ नन्वकृत्युत्मेतिमात्रं अतएवगच्छितेत्यादोसंनिपातपरिभाषयायत्नोपोन अन्यथात्रालिमितकलोपस्य
बहिरंगत्वेनासिद्धत्वादिहापिपरिभाषाप्रवृत्तिर्नस्यात् इतिदिक् ननुयः शिष्यतेसलुप्यमानार्थाभिधा
यीतिन्यायेनगौरीशब्दस्यसमम्यर्थवृत्तित्वेनतत्वाभावोत आह ईदूदंतमिति सप्तम्यर्थ इत्युपात्तार्थाद्वि
स[redacted]तद्वाचकशब्दस्यविशेष्यत्वात्तदंतविधिरितिभावः ईदूतोः किं अत्राभवाति सप्तम्याडादेशः अ
त्रात्रा इत्यस्यप्रगृह्यत्वेसतिइतिशब्दस्यप्रयोगः स्यात्यदकाले वृत्तावर्थांतरेइति न चार्थग्रहणंभावेवाप्या
दिपदानामाधेयाश्वरूपार्थेवृत्तित्वेपिअधिकंतुप्रविष्टंनतुतद्धानिरितिन्यायेनसप्तम्यर्थवृत्तित्वानायो
यात्प्रगृह्यत्वंदुर्वारमितिवाच्यं अर्थग्रहणसामर्थ्यात्सप्तम्यर्थमात्रेपर्यवसन्नमित्यर्थेमात्रतत्संस्पृष्टा
